# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा अप्रिल् – २०१९

| | | |
|---|---|---|
| कक्षा – आचार्य-१ (SEM-2) | प्रश्नपत्रम् –३ | गुणाः - ७० |
| विषयः – सर्वदर्शनम् | CC- 4.2.5 | समयः – ११:०० तः २:०० |
| दिनाङ्कः – १२/०४/२०१९ | ग्रन्थः – न्यायसिद्धान्तमुक्तावली किरणावलीसमेता | |

### प्रथमान्वितिः (युनिट-१)

**प्रश्नः -१ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

(१) गुणत्वजातिं सुसाध्य गुणानां साधर्म्यं व्याख्यात।

(२) मूर्तगुणाऽमूर्तगुणान् व्याख्यात।

**प्रश्नः -२ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु।** १०

(१) वैशेषिकमते नैयायिकमते च पाकप्रक्रियां विवृणुत।

(२) नवक्षणा-दशक्षणा-एकादशक्षणा च प्रक्रिया सबीजं निरूपणीया।

### द्वितीयान्वितिः (युनिट-२)

**प्रश्नः -३ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

(१) "अपेक्षाद्धिनाशाच्च नाशस्तेषां निरूपितः" कारिकां व्याख्यात।

(२) त्र्यसरेणुपरिमाणस्य किं कारणम्? व्याख्यात।

**प्रश्नः -४ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु।** १०

(१) संयोगाख्यं गुणं कारिकामुक्तावलीसहितं व्याख्यात।

(२) प्रमात्वस्य स्वतोग्राह्यत्वमतं प्रदर्श्य तत्खण्डनपूर्वकं न्यायमतं प्रदर्शनीयम्।

### तृतीयान्वितिः (युनिट-३)

**प्रश्नः -५ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

(१) उपाधेः स्वरूपलक्षणे व्याख्यात।

(२) शब्दोपमानयोः प्रमाणान्तरत्वं प्रतिपादयत।

**प्रश्नः -६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु।** १०

(१) अन्यथाख्यातिस्वीकारे मीमांसकयुक्तिं प्रदर्श्य खण्डयत।

(२) व्याप्तिग्रहोपायान् यथाग्रन्थं प्रतिपादयत।

### चतुर्थान्वितिः (युनिट-४)

**प्रश्नः -७ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

(१) सुखदुःखेच्छाद्वेषस्वरूपं स्पष्टयत।

(२) चिकीर्षा कीदृशी, किं च तत्कारणमिति व्याख्यात।

**प्रश्नः -८ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

(१) अदृष्टं निरूप्य यागध्वंसस्य व्यापारत्वं कथं नास्तीति व्याख्यात।

(२) न कलञ्जं भक्षयेदित्यत्र विध्यर्थः कीदृशः? बोधश्च कथमिति स्पष्टयत।

**प्रश्नः -९ दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** **१०**

(१) अनुमानं कतिविधम्?

(२) व्याप्तिः कतिविधा?

(३) परतःप्रामाण्यवादिनः के?

(४) चक्षुर्ग्राह्यं किम्?

(५) का अपेक्षाबुद्धिः?

(६) किं नाम परिमाणम्?

(७) कः संयोगः?

(८) नैयायिकमते प्रमाणानि कति?

(९) न्यायसिद्धान्तमुक्तावल्याः कर्ता कः?

(१०) मनसः लक्षणं किम्?

(११) संख्या का?

(१२) द्व्यणुकादावपि पाकः केषां मते भवति?

(१३) विभागः कतिविधः?

(१४) प्रमात्वं न स्वतो ग्राह्यं कस्मात्?

(१५) न्यायदर्शने कति गुणाः सन्ति?

***

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा अप्रिल् – २०१९

| | | |
|---|---|---|
| कक्षा – आचार्य-१ (SEM-2) | प्रश्नपत्रम् –३ | गुणाः – ७० |
| विषयः – सर्वदर्शनम् | CC- 4.2.5 | समयः - |
| दिनाङ्कः - | ग्रन्थः – न्यायसिद्धान्तमुक्तावली | |

समाधानानि

प्रश्नः - ९

१. त्रिविधमनुमानम्।
२. द्विविधा।
३. नैयायिकाः।
४. रूपम्।
५. अयमेकोऽयमेक इत्याकारिकाबुद्धिः।
६. परिमितिव्यवहारासाधारणं कारणं परिमाणम्।
७. अप्राप्तयोस्तु या प्राप्तिः सा एव।
८. चत्वारि।
९. विश्वनाथपञ्चाननभट्टाचार्यः।
१०. सुखाद्युपलब्धिसाधनमिन्द्रियं मनः।
११. गणनाव्यवहारासाधारणकारणं संख्या।
१२. नैयायिकानां मते।
१३. त्रिविधः विभागः।
१४. संशयानुपपत्तितः।
१५. चतुर्दशगुणाः।